परिच्छिन्नः, त्रि, ( परि + छिद् + कर्म्मणि क्तः । ) परिच्छेदविशिष्टः । अवधिप्राप्तः । यथा,—
"परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि ।"
इति महिम्नः स्तोत्रम् ॥
सर्व्वतोभावेन छेदविशिष्टश्च ॥

परिच्छेदः, पुं, ( परि + छिद् + भावे करणादौ च घञ् । ) ग्रन्थविच्छेदः । यथा, त्रिकाण्डशेषे ॥
"सर्गवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम् ॥
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः ॥"
( तत्र काव्ये सर्गः । कोषे वर्गः । अलङ्कारे परिच्छेदोच्छ्वासौ । कथायामुद्घातः । पुराणसंहितादौ अध्यायः । नाटके अङ्कः । तन्त्रे पटलः । ब्राह्मणे काण्डम् । संगीते प्रकरणम् । इतिहासे पर्व्व । भाष्ये आह्निकम् । एवमन्येऽपि पादतरङ्गस्तवकप्रपाठकस्कन्धमञ्जरीलहरीशाखादयो ग्रन्थसन्धयो ग्रन्थभेदे यथायथं ज्ञेयाः ॥*॥) सीमा । अवधिः । यथा, मालतीमाधवे ।
"परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जड़यति च तापञ्च कुरुते ॥"

परिजनः, पुं, ( परिगतो जनः । ) परिवारः । पोष्यवर्गः । यथा, महिम्नः स्तोत्रे ।
"यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीम्
अधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥"
नियतसन्निधिवर्त्तिपरिचारकः । यथा, आनन्दलहर्य्याम् । ३० ।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं
भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥"
" परिजनः नियतसन्निधिवर्त्तिपरिचारकः । " इत्यस्य श्लोकस्य व्याख्यायां गोपीरमणतर्कपञ्चाननः ॥

परिजल्पितं, क्ली, ( परि + जल्प + भावे क्तः । ) दशाङ्गचित्रजल्पान्तर्गतद्वितीयजल्पनम् । यथा,
"प्रभोर्निर्द्दयताशाठ्यचापलाद्युपपादनात् ।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥"
इत्युज्ज्वलनीलमणिः ॥

परिज्मा, [ न् ] पुं, ( परिजायते इति । परि + जन् + मन् । निपातनात् साधुः । ) चन्द्रः । अग्निः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ ( पर्य्यजतीति । अजेः परिपूर्व्वस्य श्वन्नुक्षन्नित्यादिना मनृप्रत्ययोऽकारलोपः आद्युदात्तत्वञ्च निपात्यते । परिगन्ता । इति वेदभाष्यम् ॥ )

परिज्वा, [ न् ] पुं, ( परि + ज्ञु सौत्रधातुः + "श्वन्नुक्षन् पूषन्निति ।" उणां । १ । १५८ । इति कनिन् । इदन्त उज्ज्वलदत्तमतम् । ) इन्द्रः । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥

परिडीनकं, क्ली, ( परि + डी + क्तः । ततः स्वार्थे कन् । ) पक्षिगतिविशेषः । यथा,—
"डीनं प्रडीनमुड्डीनं संडीनं परिडीनकम् ।"
इति जटाधरः ॥
(तथाच महाभारते । ८ । ४१ । २७ ।
"अतिडीनं महाडीनं खडीनं परिडीनकम् ॥")

परिणतं, त्रि, ( परिणमति स्म । परि + नम् + क्तः । ) पक्वम् । इत्यमरः । ३ । १ । ६६ ॥ तिर्य्यग्घातिगजः । इति हेमचन्द्रः ॥ ( यथा, माघे । ४ । २९ ।
"सततमसुमतामगम्यरूपाः
परिणतदिक्करिकास्तटीर्बिभर्त्ति ॥" )
सर्व्वतोभावेन नतश्च ॥

परिणयः, पुं, ( परिणयनम् । परि + नी + अप् । ) विवाहः । इत्यमरः । २ । ७ । ५७ ॥

परिणामः, पुं, ( परिणमनम् । परि + नम् + घञ् । ) विकारः । प्रकृतेरन्यथाभावः । यथा । सुखस्य विकारः क्रोधरक्तता । केचित्तु । प्रकृतिध्वंसजन्यविकारः । यथा काष्ठस्य विकारो भस्म । मृत्पिण्डस्य घटः । इत्यमरभरतौ ॥ चरमः । शेषः । यथा,—
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥"
इति भारवौ । २ । ४ ॥
(निदानभेदेन यथा,—
"असात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणामभेदात्त्रिविधो वा ॥" "परिणामोऽयोगादियुक्ता ऋतुस्वभावजा शीतादयः । अधर्म्मस्य च रोगहेतोरत्रैवान्तर्भाव इति भट्टारहरिचन्द्रः ॥" इति माधवकरकृतरुग्विनिश्चयस्य पञ्चनिदानव्याख्याने विजयेनोक्तम् ॥
"कालस्य परिणामेन जरामृत्युनिमित्तजाः ।
रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः ॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये ॥
अर्थालङ्कारभेदः । तल्लक्षणं यथा,—
"परिणामः क्रियार्थश्चेद्विषयी विषयात्मना ॥")

परिणामदर्शी, [ न् ] त्रि, (परिणामं चरमं पश्यतीति । दृश् + णिनि । ) चरमकालप्रेक्षी । पश्चाद्दर्शी । विषयादिः शेषद्रष्टा । इति भारतम् ॥

परिणामशूलः, पुं, ( परिणामे चरमावस्थायां शूलं यस्य । यद्वा परिणामे भुक्तान्नादेः परिपाके उत्पद्यते शूलं यस्मात् । ) रोगविशेषः । तस्योत्पत्तिर्यथा,—
"स्वैर्निदानैः प्रकुपितो वायुः सन्निहितो यदा ।
कफपित्ते समावृत्य शूलकारी भवेद्बली ॥"
तस्य लक्षणं यथा,—
"भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् ।
तस्य लक्षणमप्येतत् समासेनाभिधीयते ॥"
वातिकस्य तस्य लक्षणं यथा,—
"आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः ।
स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेद्भिषक् ॥"
पैत्तिकस्य तस्य लक्षणं यथा,—
"तृष्णादाहारतिस्वेदकट्वम्ललवणोत्तरम् ।
शूलं शीतशमप्रायं पैत्तिकं लक्षयेद्भिषक् ॥"
श्लैष्मिकस्य तस्य लक्षणं यथा,—
"छर्द्दिहृल्लाससम्मोहं स्वल्परुग्दीर्घसन्तति ।
कटुतिक्तोपशान्तौ च तद्विज्ञेयं कफात्मकम् ॥"
त्रिदोषजस्य तस्य लक्षणं यथा,—
"संसृष्टलक्षणं बुद्ध्वा द्विदोषं परिकल्पयेत् ।
त्रिदोषजमसाध्यन्तु क्षीणमांसबलानलम् ॥"
इति माधवकरः ।
तस्यौषधं यथा, गरुड़पुराणे ।
"लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा ।
मधुना खादितं रुद्र ! परिणामाख्यशूलनुत् ॥"
(चिकित्सास्य यथा,—
"वमनं तिक्तमधुरैर्विरेकश्चापि शस्यते ।
वस्तयश्च हिताः शूले परिणामसमुद्भवे ॥
विड़ङ्गतण्डुलव्योषं त्रिवृद्दन्तीसचित्रकम् ।
सर्व्वाण्येतानि संचूर्ण्य श्लक्ष्णचूर्णानि कारयेत् ॥
गुड़ेन मोदकं कृत्वा भक्षयेत् प्रातरुत्थितः ।
उष्णोदकानुपानन्तु दद्यादग्निविवर्द्धनम् ॥
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥
नागरगुड़तिलकल्कं पयसा संसाध्य यः पुमान्नद्यात् ।
उग्रं परिणामशूलं तस्यापैति सप्तरात्रेण ॥"
"तिलनागरपथ्यानां भागं शम्बूकभस्मनाम् ।
द्विभागगुड़संयुक्तं गुड़ीं कृत्वाक्षभागिकाम् ॥
शीताम्बुपानं पूर्व्वाह्णे भक्षयेत् क्षीरभोजनः ।
सायाह्ने रसकं पीत्वा नरो मुच्येत दुर्ज्जयात् ॥
परिणामसमुत्थाच्च शूलाच्चिरभवादपि ।
शम्बूकं त्र्यूषणञ्च पञ्चैव लवणानि च ॥
समांशां गुड़िकां कृत्वा कलम्बीकरसेन वा ।
प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम् ॥
शूलाद्विमुच्यते जन्तुः सहसा परिणामजात् ॥
यः पिबति सप्तरात्रं प्रसृतीनेकान् कलाययूषेण ।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम् ॥
लौहचूर्णं वरायुक्तं विलीढ़ं मधुसर्पिषा ।
परिणामशूलं शमयेत्तत्कालं वा प्रयोजितम् ॥
सामुद्रं सैन्धवं क्षारो रुचकं रौमकं विड़म् ।
दन्ती लौहरजः किट्टं त्रिवृच्छूरणकं समम् ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णाजीर्णे तु भुञ्जीत मांसादिघृतसाधितम् ।
नाभिशूलं प्लीहशूलं यकृद्गुल्मकृतञ्च यत् ॥
विद्रध्यष्ठीलिकां हन्ति कफवातोद्भवन्तथा ।
शूलानामपि सर्व्वेषामौषधं नास्ति तत् परम् ॥
परिणामसमुत्थस्य विशेषेणान्तकृन्मतम् ॥"
इति सामुद्राद्यं चूर्णम् ॥ * ॥
"सपिप्पलीगुड़ं सर्पिः पचेत् क्षीरे चतुर्गुणे ।
विनिहन्त्यम्लपित्तञ्च शूलञ्च परिणामजम् ॥"
इति गुड़पिप्पलीघृतम् ॥ * ॥
"क्वाथेन कल्केन च पिप्पलीनां
सिद्धं घृतं माक्षिकसंप्रयुक्तम् ।